# M.A. 1st Semester Examination, 2019

## SANSKRIT

PAPER – SAN-104

*Full Marks* : 40

*Time* : 2 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

प्रश्नानां सर्वेषामुत्तरं संस्कृतेनैव प्रदेयम्

1. यथानिर्देशमुत्तरं दीयताम् — 4 × 2

(क) यथेच्छं द्वयं समाधेयम् — 2 × 2

(*i*) उत्तररामचरितस्य कः रचयिता ? प्रथमाङ्कस्य नाम किम् ?

(*ii*) 'उत्तररामचरितम्' — इति नाटकस्य नामकरणं किमर्थम् ?

( *Turn Over* )

(*iii*) उत्तररामचरितस्य द्वितीयाङ्के स्थितस्य विष्कम्भकः कीदृशः ? तल्लक्षणं वा किम् ?

(*iv*) रामचन्द्रमते केषां द्रव्याणां पुनः शुद्धिः नापेक्ष्यते ?

(ख) यथेच्छं द्वयं समाधेयम् — $2 \times 2$

(*i*) नाट्यशास्त्रस्य कः रचयिता ? अस्य प्रसिद्धटीकायाः टीकाकारस्य च परिचयो देयः ।

(*ii*) 'प्रणम्य शिरसा देवौ पितामहमहेश्वरौ'
— इत्यत्र 'शिरसा' इति शब्दस्य अभिनवगुप्ताचार्येण कोऽर्थः कृतः ?

(*iii*) 'क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद्भवेत्' — कमुद्दिश्य केन वाक्यमिदमुक्तम् ?

(*iv*) नाट्यमण्डपः कतिविधः ? कश्च उत्तमः ?

**2.** यथानिर्देशमुत्तरं दीयताम् — $4 \times 4$

(क) सप्रसङ्गं व्याख्या कार्या (कयोश्चिद् द्वयोः) — $4 \times 2$

(*i*) लौकिकानां हि साधूनामर्थं वागनुवर्तते ।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुवर्तते ।।

(*ii*) किं त्वनुष्ठाननित्यात्वं स्वातन्त्र्यमपकर्षति ।
संकटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता ।

(*iii*) वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।
भवति हि पुनर्भूयान्भेदः फलं प्रति तद्यथा
प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदादयः ॥

(*iv*) ईदृशानां विपाकोऽपि जायते परमाद्भुतः ।
यत्रोपकरणीभावामायात्येवंविधो जनः ॥

(ख) सप्रसङ्गं व्याख्या कार्या (कयोश्चिद् द्वयोः) — 4 × 2

(*i*) जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानाथर्वणादपि ॥

(*ii*) कुशला ये विदग्धाश्च प्रगल्भाश्च जितश्रमाः ।
तेष्वयं नाट्यसंज्ञो हि वेदः संक्राम्यतां त्वया ॥

(*iii*) नैकान्ततोऽत्र भवतां देवानां चानुभावनम् ।
त्रैलोक्यास्यास्य सर्वस्य नाट्यं भावानुकीर्तनम् ॥

(*iv*) दिव्यानां मानसी सृष्टिर्गृहेषूपवनेषु च ।
नराणां यत्नतः कार्याः लक्षणाभिहिताः क्रियाः ॥

3. यथानिर्देशमुत्तरं दीयताम् — 8 × 2

(क) भवभूतिविरचितस्य 'उत्तररामचरितम्' इति नाटकस्य द्वितीयाङ्कस्य नाटकीयसौष्ठवं सम्यगालोच्याताम् ।

*अथवा*

उत्तररामचरितनाटकस्य तृतीयोऽङ्कस्य वैशिष्ट्यं श्रेष्ठत्वञ्च आलोच्यताम् ।

(*ख*) नाट्यशास्त्रकारानुसारेण कति वृत्तय: सन्ति ? तेषां नामानि उल्लिख्य कैशिकीवृत्ते: स्वरूपं प्रस्तूयताम् ।

*अथवा*

कतिविधं नाट्यमण्डपम् ? तेषु मध्यमप्रमाणस्य नाट्यमण्डपस्य उपयोग: प्रमाणञ्च सविस्तरमालोच्यताम् ।